सिद्धान्तमाला.

श्रीमत्गदाधरभट्टाचार्यकृतव्युत्पत्तिवादग्रन्थसिद्धान्तसंग्रहरूपा.

महामहोपाध्याय-
श्रीकोटिलिङ्गपुरगोदवर्म-
राजविरचिता.

तदन्तेवासिना ए. कृष्णनाम्ना प्रकाशिता.

श्रीशिवपुरे

"मङ्गळोदय" जनतार्धानकेरळकल्पद्रुममुद्रालये मुद्रिता.

केरळाब्दाः १०८६

मूल्यं कलाषट्कम्.

उपोद्घातः.


इह खलु श्रीमत्गदाधरभट्टाचार्यविरचितो नैयायिकमतानुसारिबोधप्रकाराणां निपुणं प्रतिपादकतया मीमांसकादिदूषितप्राचीनन्यायसिद्धान्तानां तत्तद्दूषणनिराकरणपूर्वकं व्यवस्थापकतया चानितरसाधारणमहिमा व्युत्पत्तिवादनामा कोपि सुमहितो ग्रन्थस्सुशिक्षितधियामपि पण्डितप्रवणानां श्लाघापदवीमधिरोहतीति सुप्रसिद्धमेतत् । चिराय किल सर्वेऽपि शाब्दबोधप्रकारजिज्ञासवस्तमेव हि ग्रन्थमधीत्य कृतार्थतामात्मनोऽधिगच्छन्ति । विद्वत्सभास्वपि पण्डितप्रेष्ठैस्तमेवाधिकृत्य किल वादप्रतिवादकथा प्रस्तूयते । एवमत्यन्तोपाकारकतया परमोत्तमोऽपि सोऽयं व्युत्पत्तिवादो बहुतरपूर्वपक्षतन्निराकरणप्रस्तावैर्मतविशेषप्रदर्शनादिभिश्च सर्वतस्संकलिततया नातिपरिचितशास्त्राणां मन्दप्रज्ञानां च विविच्य तत्तत्सिद्धान्तग्रहणे परमायासमेव जनयतीति नायमज्ञातो भवति लोकानाम् । तमिममर्थमन्तराधाय करुणाशालिभिः श्रीभारतचक्रवर्तिसमर्पितमहामहोपाध्यायपदबिरुदविराजमानैः श्रीमत्केरळमण्डलान्तर्गतकोटिलिंगपुरनाथैस्सुगृहीतनामभिर्भट्टश्रीगोदवर्मराजैराचार्यपादैस्तत्ग्रन्थसिद्धान्तानां संग्रहरूपस्सिद्धान्तमालाख्योऽयमपूर्वग्रन्थो निरमायि । यत् पुनरयं संग्रहस्तत्रतत्र सिद्धान्तानामुपरिसंभाव्यमानानि दूषणान्युद्धृत्य विशेषतोऽपि परिष्कृततया तत्तत्सिद्धान्तस्मरणपठनादिविषये लाघवातिशयकारिकारिकारूपतया च न केवलं मन्दप्रज्ञानां परं विदुषां धीमतामप्यतीवोपकृतिप्रद एव सञ्जात इति तदयं हि स्वभावो महतां प्रज्ञाविलसितस्य । इति शिवम् ।

शिवपुरम्
25—1—1911

प्रकाशकः
A. Krishna Pisharoty

श्रीः

सिद्धान्तमाला



श्रीमहादेव्यै नमः


यदिच्छयैवशब्दाना मर्थोपस्थितिहेतुता
सर्वेषां स शिवो भूया दर्थोपस्थितये मम. १
व्युत्पत्तिवादमाश्रित्य सिद्धान्ता गोदवर्मणा
संगृह्यन्ते केचनातः प्रीयतां गिरिजापतिः. २
अस्त्येव शठकोपाख्यगुरुकारुण्यतो मम
सामर्थ्यमीदृशे कर्मण्यतिमन्दमतेरपि. ३
सप्तधा सुब्विभक्तिस्स्यात् प्रथमादिविभेदतः
संख्यैव प्रथमार्थोऽत्र प्रकृत्यर्थे तदन्वयः. ४
एकत्वत्वादिकं शक्य तावच्छेदकमिष्यते
शक्तितावच्छेदकन्तु सुत्वौत्वादिकमेव हि. ५
एकद्विवचनत्वादेर्दुर्वचत्वेन हेतुना
शक्तितावच्छेदकत्वं लाघवेऽपि न संभवेत्. ६
प्रकृतेरानुपूर्वीणामनन्तत्वेन गौरवात्
शक्तितावच्छेदकत्वे न संख्यायास्तदर्थता. ७

यद्वा संख्यायुते स्वार्थे प्रकृतेर्लक्षणा यथा
प्रकर्षादियुते धातोर्द्योतकाः प्रादिवत्सुपः. ८
संख्यायाः प्रकृतेरर्थे समवायेन नान्वयः
किंतु पर्याप्तिसंज्ञेन संबन्धेनेति कथ्यते. ९
समवायेनान्वयश्चेदेकव्यक्तिपरादपि
आकाशकालादिपदात् भवेत् द्विवचनादिकम्. १०
उद्देश्यतात्ववच्छेदा येन तद्व्याप्यतावती
पर्याप्तिरेव द्वित्वादिसंबन्धो न तु केवला ११
तेन प्रत्येकसत्वेऽपि पर्याप्तिरुभयस्थ तु
प्रत्येकानतिरेकान्न तद्दोषतदवस्थता. १२
वैज्ञानिकं व्याप्तिमत्वं पर्याप्तौ योग्यताभ्रमात्
आकाशावित्यादिवाक्यजातबोधानुरोधतः. १३
व्याप्तिरत्र व्यापकताघटिता तेन न क्षतिः
तत्र यत्र प्रकृत्यर्थः केवलान्वयिधर्मवान्. १४
आकाशं न द्व इत्यादौ पर्याप्त्या द्वित्ववत्भिदा
प्रतीयते केवलया नाप्तसिद्धोविशिष्टया. १५
यथाऽवच्छिद्यते द्वित्वपर्याप्तिरुभयस्थितैः
धर्मैर्नत्वेकमात्रस्थैराकाशत्वादिभिस्तया. १६
पर्याप्त्या द्वित्ववत्भेदद्वित्वपर्याप्तिमत्भिदे
वर्त्तेते तेन गगनत्वावच्छेदेन तद्वति. १७
घटत्वे द्वित्वपर्याप्तित्वावच्छिन्नस्य वस्तुनः
अतिप्रसक्तिशून्यत्वादवच्छेदकता भवेत्. १८

समवायस्य नानात्वे समवायस्वरूपतः
नातिरिक्ता हि पर्याप्तिर्दित्वादेर्वा स्वरूपतः. १९
विशेष्यतावद्द्वयं यत्र चैका द्वित्वप्रकारता
संसर्गस्समवयो वा पर्याप्तिस्तत्र केवला. २०
अतएकं प्रबोधेच्छाप्रयुक्तस्येशकेशवौ
नमतीत्यादिवाक्यस्य भवेन्नानुपपन्नता. २१
व्यासज्यवृत्त्यवच्छिन्ना यत्र बोधेश्यता भवेत्
व्यतिरेकिपदार्थस्थं विधेयत्वं तथैवच. २२
तत्र स्वव्याप्यतद्धर्मवत्त्वेनापि प्रतीयते
विधेयं धर्मवत्त्वं तत् पर्याप्त्या पूर्वमुक्तया' २३
तेनैक घ ट व दे श प र म त्र घ टा वि ति
वाक्यं प्रमाणं न भवेदूह्यमन्यत्र च स्वयम्. २४
संख्यायास्तु प्रकृत्यर्थतावच्छेदक एव हि
सम्पन्नौ स्तो व्रीहियत्रावित्यादौ क्वचिदन्वयः. २५
या संख्या शतशब्दादिविभक्त्योपस्थिता भवेत्
तस्या अपि शतत्वादिसंख्यायामेव चान्वयः. २६
संख्येयवाचका एव शब्दास्सर्वे शतादयः
दद्यात् गवां शतं शुल्कमित्यादौ गत्यभावतः. २७
एक द्वि ब हु श ब्दा दि प रै क व च ना दि कम्
न संख्याबोधकमिति प्रथमा सा निरर्थिका. २८
एकव्यक्तिपरावादिशब्दप्रकृतिकाऽपि च
प्रथमा न तु संख्याया बोधिकेति निरर्थिका. २९

घटो वर्त्तत इत्यादौ सुपैवैकत्वबोधतः
तिङेकवचनं संख्याबोधकं नेष्यते बुधैः. ३०
तिङन्तार्थटिताद्वाक्यादेकत्वान्वयबोधतः
सुबेकवचने संख्याबोधकत्वमुपेयते. ३१

इति प्रथमा समाप्ता.



अथ द्वितीया.

कर्मत्वं हि द्वितीयार्थः कर्मणीत्यनुशासनात्
कर्मत्वञ्च क्रियाजन्यफलशालित्वमिष्यते. १
जन्यत्वं तत्र संसर्गविधयैव हि भासते
न संसर्गतया भानं पदार्थत्वमपेक्षते. २
क्रिया तु धातुलभ्याऽतः कर्मत्वान्तःप्रविष्टयो.
अप्येतयोर्द्वितीयार्थप्रवेशो नाभ्युपेयते. ३
तथाच फलमेवात्र द्वितीयार्थस्तदन्यतः
व्यापारमात्रार्थकत्वात् गम्यादेर्ह्येव लभ्यते. ४
आकाङ्क्षा च द्वितीयादेः फलबोधप्रयोजिका
गम्यादिनैव न स्पन्दत्यादिनाऽप्युपगम्यते. ५
अतः स्पन्दिद्वितीयाभ्यां समुपस्थापितार्थयोः
ग्रामं स्पन्दत इत्यादौ यिथो नान्वयधीर्भवेत्. ६
स्पन्दत्यादेस्सकर्मत्वव्यवहारोऽत एव न
फलान्वितस्वार्थबोधहेतुत्वं तन्नियामकम्. ७

कर्मप्रत्ययशून्यानां गम्यादीनां न केवले
व्यापारेऽनादितात्पर्यं किन्तु तत्तत्फलैर्युते. ८
प्रामाणिकानामेकार्थतात्पर्येण तथासति
न प्रयोगस्स्वारसिको गमनत्यागशब्दयोः ९
एवं कर्मप्रत्ययानामपि त्यज्यादिभिस्सह
प्रयुक्तानां विभागादावेव तात्पर्यमीदृशम्. १०
अत एव न संयोगतात्पर्येण प्रयुज्यते
त्यज्यति ग्राममित्यादि प्राचीनानां मतन्त्विदम्. ११
तत्तत्फलयुतस्पन्दो गम्याद्यर्थो न केवलः
सकर्मता च फलवत्स्पन्दबोधकता तथा. १२
तदर्थफलवत्वं तद्धातुकर्मत्वमिष्यते
अतो न पूर्वदेशादौ गम्यादेः कर्मता भवेत्. १३
तथासति फलस्यापि धातुनैव च लाभतः
द्वितीयार्थो हि वृत्तित्वमात्रं तस्य फलेऽन्वयः. १४
सप्तम्यधीनवृत्तित्वस्मृत्यादिसहिता हि या
व्यापारे सैव सामग्री वृत्तित्वान्वयबोधिका. १५
व्यापारेऽतो द्वितीयार्थवृत्तित्वान्वयधीच्छया
प्रयुञ्जते न द्वितीयां सप्तमीमिव सूरयः. १६
फलाश्रयानवच्छिन्नफलस्थविषयत्ववत्
स्मरणं स्यात् द्वितीयार्थवृत्तित्वान्वयबोधकम्. १७
अधस्संयोगवत्स्पन्दवाचकैर्धातुभिस्सह
प्रयोगेऽतो न द्वितीया पदात् फलवदर्थकात्. १८

जुहोत्यर्थेऽग्निसंयोगो घटको न तु केवलः
तद्योगेऽपि द्वितीया न तत्संयोगवदर्थकात्. १९
न हि वन्हौ जुहोतीति प्रयोगोऽधिकभानतः
विधेये संस्कृते वन्हौ जुहोतीत्यस्य युक्तता. २०
अग्निसंयोगजनकस्पन्दरूपफलाश्रयम्
घृतं कर्म द्वितीयाऽतस्तद्वाचकपदात् परम्. २१
स्वस्वत्वध्वंससहितपरस्वत्वप्रयोजिका
इच्छा धनं ददात्येवमादौ धात्वर्थ उच्यते. २२
सस्वत्वध्वंसजनिका परस्वत्वप्रकारिका
इच्छाऽथवा तत्र धातोर्दैदातेरर्थ उच्यते. २३
आद्ये पक्षे परस्वत्वे द्वितीयार्थान्वयो मतः
द्वितीयपक्षे स्वस्वत्वध्वंस एव तदन्वयः. २४
इच्छा स्वस्वत्वजनिका प्रतिग्रह उदीर्यते
पाको रूपध्वंसहेतुतेजस्संयोग इष्यते. २५
ओदनं पचतीत्यादावोदनादिपदस्य च
निष्पादकेष्वोदनादेस्तण्डुलादिषु लक्षणा. २६
तण्डुलं पचतीत्यादौ तण्डुलादिपदस्य च
परमाणावेवपाके परमाणुषु लक्षणा. २७
गलाधोदेशसंयोगहेतुकर्मप्रयोजकः
व्यापार ओदनं भुङ्क्त इत्यादौ शक्तिरिष्यते. २८
उक्तयुक्त्या न द्वितीया गलाधोदेशवाचकात्
सकर्मकाणामन्येषामर्थ ऊह्यस्स्वयं बुधैः. २९

ग्रामो गम्यत इत्यादौ स्पन्दजन्यफलाश्रयः
ग्राम इत्यादिबोधेन कर्मोक्त्यातं फलार्थकम्. ३०
स्पन्दे विशेषणत्वेन धात्वर्थेषु प्रवेशतः
फलस्य तद्विशेष्यत्वं शाब्दबोधे न संभवेत्. ३१
द्वेधा च फलभानस्य यदि नानुभवस्तदा
फलव्यापारयोर्द्धातोः पृथगेवास्तु शक्यता. ३२
गां दोग्धि पय इत्यादौ गामित्यादिद्वितीयया
धात्वर्थफलशालित्वात् कर्मतान्यैव बोध्यते. ३३
योऽपादानत्वादिभिन्नधात्वर्थान्वयिधर्मवान्
तस्याकथितसूत्रेण कर्मसंज्ञाविधानतः. ३४
एतत्कर्मत्वघटकस्य धर्मस्यस्थलभेदतः
विभागप्रतियोगित्वद्वृत्तित्वाद्यात्मको भवेत्. ३५
एवञ्चात्र विभागस्य बोधिका गोपदोत्तरा
द्वितीया तस्य जनकत्वेन च क्षरणेन्वयः. ३६
क्षरणान्वयिवृत्तित्वं बोध्यतेऽन्यद्वितीयया
दुहिश्च क्षरण्यस्यानुकूलव्यापारवाचकः. ३७
वस्तुतोऽत्र विभागोऽपि दुह्यर्थो गोपदोत्तरा
द्वितीयाऽपि विभागान्वयाधेयत्वस्य बोधिका. ३८
धातुवृत्तिग्रहे साक्षाद्विशेष्यांशे प्रकारता
धात्वर्थेत्यादिकर्मत्वगता धात्वर्थता मता. ३९
अतो विभागे धात्वर्थगतेऽपि न गवादिषु
धात्वर्थफलशालित्वस्वरूपा कर्मता भवेत्. ४०

विभागान्वयिनोरेवं सत्याधेयावधित्वयोः
स्यातां द्वितीयापञ्चम्योर्विवक्षे च नियामिके. ४१
द्वितीययाऽत्रान्यसमवेतत्वमपि बोध्यते
अन्यत्वञ्च विभागान्वयित्ववत्प्रतियोगिकम्. ४२
अन्यथाऽत्र पयो दोग्धि पय इत्यादिकं भवेत्
क्षरणस्य क्षीरनिष्ठविभागजनकत्वतः. ४३
क्षीरे गवादिसंबन्धविवक्षायाश्च गोपदात्
द्वितीयाप्राप्तिविरहात् भवेत्षष्ठ्येव शैषिकी. ४४
दुह्यादिकर्माख्यातेन गौणकर्मत्वमुच्यते
गवादिद्वित्यप्रधाने दुहादीत्यनुशासनात्. ४५
पदैरघटिते वाक्ये वाचकैर्गौणकर्मणाम्
क्षीरादिमुख्यकर्मत्वं कर्माख्यातेन बोध्यते. ४६
एकदोभयकर्मत्वबोधनं नाभ्युपेयते
तेन क्षीराणि दुह्यन्ते गौरित्यादि न संभवेत्. ४७
याचते मंगळं शंभुमेवमादिषु याचतिः
आचष्ट इच्छां व्यापारप्रयोज्यत्वप्रकारिकाम्. ४८
व्यापारान्वयि वृत्तित्वं शंभुशब्दद्वितीयया
बोध्यते परयेच्छान्वयिनी विषयिता तथा. ४९
दुहियाचिरुधिप्रच्छीत्यादिशास्त्रस्थयाचतिः
निरुक्तार्थक एवात्र शंभ्वादौ गौणकर्मता. ५०
प्रदेशान्तरसञ्चारस्यानुत्पत्तिप्रयोजकः
व्यापारो गां रुणध्येवमादौ रुध्यर्थ उच्यते. ५१

बोध्यते प्रतियोगित्वं व्रजशब्दद्वितीयया
वृत्तित्वमन्यया तद्वत् गौणं कर्म व्रजादिकम्. ५२
तत्र धात्वर्थगतयोर्भेदानुत्पादयोः क्रमात्
प्रतियोगित्ववृत्तित्वे प्रकृत्यर्थान्वितेऽन्वितः. ५३
चैत्रो धर्मं गुरुं पृच्छत्यवगादिषु पृच्छतेः
अर्थश्शब्दो हि जिज्ञासाज्ञानोद्देश्यकयत्नजः. ५४
जिज्ञासाविषयिज्ञानेऽन्वेति गुर्वादिवृत्तिता
शब्दे धर्मादिविषयित्वं गुरौ गौणकर्मता ५५
धर्मं ब्रूते गुरुः शिष्यमित्यादौ गौणकर्मता
शिष्येऽर्थो ब्रूतेश्शब्दो ज्ञानोद्देश्यकयत्नजः ५६
अत्र शिष्यादिवृत्तित्वधर्मादिविषयित्वयोः
द्वितीयान्तार्थयोर्ज्ञाने धात्वर्थघटकेऽन्वयः. ५७
पौरवं याचते विप्रो गामित्यादौ तु याचतिः
स्वोद्देश्यकप्रदानेच्छारूपभिक्षार्थको मतः. ५८
दानेऽन्वेति द्वितीयान्तबोध्या पौरववृत्तिता
गवादिविषयित्वञ्च गौणकर्मात्र पौरवः. ५९
या क्रियोत्तरसंयोगजनिका तत्प्रयोजकः
ग्रामं गाञ्छयतीत्यादौ व्यापारो धातुनोच्यते. ६०
संयोगक्रिययोर्ग्रामगोवृत्तित्वेऽन्वितः क्रमात्
एवमेव वहत्यादिघटितेऽप्यन्वयादिकम्. ६१
प्रधानकर्मण्याख्येये लादीनित्यनुशासनात्
गवादिमुख्यकर्मत्वं कर्माख्यातेन बोध्यते. ६२

द्रव्यं निरूपयत्येवमादौ धातुश्चरादिगः
ज्ञानानुकूलव्यापारवाचको णिञ्निरर्थकः. ६३
अत्र धात्वर्थघटकज्ञानांशे वृत्तितान्वये
साकांक्षत्वं द्वितीयायास्सूरिभिर्नोपगम्यते. ६४
तेन ज्ञानेऽत्र शिष्यादिवृत्तित्वान्वयधीच्छया
शिष्यं निरूपयत्येवमादिकं न प्रयुज्यते. ६५
भोजयित्वा तृणं वत्सान् यापयन् घोषमच्युतः
जनयन् गोपिकानन्दं दुःखं मे नाशयत्वजः. ६६
पाठयित्वाऽर्जुनं गीतामात्मानं ज्ञापयन् हरिः
नाशयन्नर्जुनाज्ञानं सुखं मे जनयत्वजः. ६७
इत्यादौ णिच्प्रकृत्यर्थकर्त्रर्थकपदोत्तरा
द्वितीया गतिबुद्धीतिशास्त्रात् कर्तृत्वबोधिका. ६८
गतेर्ज्ञानस्य चोत्पत्तेः कर्तृताऽश्रयतैव हि
पाठभुक्त्योश्चानुकूलयत्नवत्त्वात्मिका तु सा. ६९
कर्तृत्वं प्रतियोगित्वं तथा नाशनिरूपितम्
निरूपकतया तस्य गत्यादावन्वयो मतः. ७०
नवीनैर्यत्राऽनुकूलकृतिमत्ता तु कर्तृता
तत्र प्रयत्नजन्यत्वं द्वितीयार्थतयोच्यते. ७१
यत्राऽश्रयत्वं कर्तृत्वं तत्र वृत्तित्वमेव च
यत्र तु प्रतियोगित्वं तत्र वाच्याऽनुयोगिता. ७२
नान्यत्र गत्याद्यर्थेभ्यो द्वितीया कर्तृवाचकात्
तेन न ह्योदनं भृत्यं पाचयत्येवमादयः. ७३

गत्यादिभिन्नधात्वर्थकर्त्रर्थकपदादपि
द्वितीया ण्यन्तधात्वर्थकर्मवाचित्वतो भवेत्. ७४
अत एवात्र भट्ट्यादिप्रयोगोऽप्युपपद्यते
अजिग्रहत्तं जनको धनुरित्येवमादिकः. ७५
गतिबुद्धीत्यादिसूत्रं गत्याद्यर्थकधातुभिः
योगे द्वितीयानियमसिध्यर्थमिति केचन. ७६
एषामयमभिप्रायो व्यापारः कर्तृताऽपि च
ण्यर्थो निर्वाहकत्वेन व्यापारे कर्तृतान्वयः. ७७
यद्धातोः परमाख्यातं यादृक्कर्तृत्ववोधकम्
णिच्प्रत्ययोऽपि तद्धातोः तादृक्कर्तृत्ववोधकः. ७८
अतः क्वचिद्व्यधिरूपा क्वचिदाश्रयतात्मिका
क्वचित्तु प्रतियोगित्वस्वरूपा भाति कर्तृता. ७९
निर्वाह्यत्वेन कर्तृत्वं फलमत्र तदाश्रये
स्वतन्त्रे कर्त्तरि भवेत् ण्यन्तधात्वर्थकर्मता. ८०
तथाचण्यर्थकर्तृत्वे भृत्याद्याधेयतान्वये
विवक्षिते भृत्यमन्नं पाचयत्येवमादयः. ९१
भृत्यादिकर्तृता पाकविशेषणतया यदा
विवक्ष्यतेऽन्नं भृत्येन पाचयत्येवमादयः. ८२
अभेदेन तृतीयार्थकृतेर्ण्यर्थकृतावपि
पाकादिपरतन्त्रत्वादन्वयोऽभ्युपगम्यते. ८३
एकः पाको यत्र चैत्रमैत्रद्वितयकर्तृकः
यज्ञदत्तस्तयोर्मध्ये मैत्रस्यैव प्रयोजकः. ८४

तत्र प्रयोगश्चैत्रेण पाचयत्येवमादिकः
कृत्यभेदान्वयस्योपगतत्वान्न भवेदिति. ८५
गतिबुद्धीति सूत्रस्य विधित्वमुपगच्छताम्
मते णिच्प्रत्ययस्यार्थो व्यापारः केवलो भवेत्. ८६
कर्तृत्वनिर्वाहकता धातुणिच्प्रत्ययार्थयोः
संसर्गस्तेन कर्तृत्वं न धात्वर्थफलं भवेत्. ८७
अतस्तदाऽऽश्रयस्यापि कर्तुः सूत्रान्तरेण न
कर्मत्वं सिद्ध्यतीत्येतत् सूत्रन्न नियमार्थकम्. ८८
अप्यन्यसमवेतत्वे द्वितीयार्थत्वमिष्यते
चैत्रस्स्वं गच्छतीत्यादिप्रयोगाणामभावतः. ७९
प्रकृत्यर्थस्यानुयोगित्वेन तत्घटकेऽन्वयः
स्यादन्यत्वे क्रियायाश्च तस्याऽऽश्रयतयाऽन्वयः. ९०
उक्तप्रयोगविरहात् या भेदप्रतियोगिता
तदवच्छेदकत्वं वा द्वितीयार्थतयोच्यते. ९१
प्रकृत्यर्थस्य वृत्तित्वसंबन्धेन च तद्गते
भेदेऽन्वयः क्रियायाश्च तस्याऽऽश्रयतयाऽन्वयः. ९२
पूर्वोक्तार्थेन चैत्रस्स्वमित्यादि न निवार्यते
स्वस्य द्वित्वावच्छिन्नस्वान्योन्याभाववत्त्वतः. ९३
यद्वा क्रियावच्छेदस्य संयोगाश्रयगामिनः
क्रियासंयोगसंसर्गघटकत्वमुपेयते. ९४
नतूक्तयोरत्र समवेतावच्छेदकत्वयोः
द्वितीयार्थत्वभेवञ्च नात्र काचित् क्षतिर्भवेत्. ९५

विषयत्वं द्वितीयार्थो ज्ञानाद्यर्थकधातुभिः
योगे निरूपकत्वेन ज्ञानादौ तस्य चान्वयः. ९६
नवीनैस्तु द्वितीयार्थो विषयित्वमुदीर्यते
घटं जानाति न पटमित्यादौ गत्यभावतः ९७
ज्ञानादेर्विषयत्वं हि कर्मत्वं तत्र लक्षणा
द्वितीयायाश्शक्तिरेव यद्वा तत्राप्यगौरवात्. ९८
चाक्षुषत्वाद्यवच्छिन्नबोधकैर्धातुभिस्सह
प्रयोगे तु द्वितीयार्थो विषयत्वं हि लौकिकम्. ९९
यत्र गन्धश्चाक्षुषादावुपनीतोऽवभासते
तत्र गन्धं पश्यतीति व्यवहाराद्यभावतः १००
जिघ्रतेश्शक्यतावच्छेदिका गन्धनिरूपिता
लौकिकी या विषयिता तद्वत्प्रत्यक्षता भवेत्. १०१
तथाच पङ्कजं जिघ्रत्येवमादौ द्वितीयया
वृत्तित्वं बोद्धयते तस्य गन्धे धात्वर्थगेऽन्वयः. १०२
वस्तुतो वृत्त्यवच्छिन्नविषयत्वनिरूपिता
प्रकारिता द्वितीयार्थो भवेच्च खलु वृत्तिता. १०३
धात्वर्थघटके गन्धविषयित्वे तथासति
निरूपितत्वेनान्वेति द्वितीयार्थप्रकारिता. १०४
तदानन्दं मृत्सुरभीत्यादावानन्दवृत्तिता
न हि जिघ्रतितात्पर्यविषयीभूतगन्धगा. १०५
तथापि रघुवंशस्थस्तत्प्रयोगस्तु युज्यते
प्रकारित्वे द्वितीयार्थत्वस्याभ्युपगतत्वतः. १०६

आनने गन्ध इत्येव राजकीयं भ्रमात्मकम्
प्रत्यक्षमिति वाक्यार्थबाधो नैवात्र विद्यते. १०७
प्रत्यक्षमात्रे घ्राधातोर्लक्षणा तेन लौकिकम्
विषयत्वं द्वितीयार्थो यत्र गन्धस्य कर्मवा. १०८
गत्यभावेन कलश आकाशन्न प्रपश्यति
इत्यादिकस्य वाक्यस्य प्रामाण्यन्नाभ्युपेयते. १०९
द्वितीयार्थोऽनुमित्यर्थधातुयोगे विधेयता
अतो द्वितीया तद्धातुयोगे लोद्देश्यवाचकात्. ११०
रजतत्वेन जानाति रंगमित्यादिके स्थले
विषयत्वं द्वितीयार्थः ज्ञाने तस्यान्वयो मतः. १११
तृतीयान्तार्थरूप्यत्वप्रकारत्वसमन्विते
ज्ञान एव द्वितीयार्थविषयत्वान्वयो भवेत्. ११२
अतो विशिष्टवैशिष्ट्यबोधमर्यादया तयोः
एकस्मिन्नपरावच्छेदकत्वमवभासते. ११३
यत्रेये रंगरजत इत्याद्याकारकभ्रमा
तत्र तादृशवाक्यस्य प्रामाण्यं तेन वारितम्. ११४
अव्युत्पन्नो विभक्त्यर्थे विभक्त्यर्थान्तरान्वयः
तेनात्र नं द्वितीयार्थे तृतीयार्थान्वयो भवेत्. ११५
शुक्तिकादावभेदेन रजतादिभ्रमस्थले
शुक्तिं रूप्येण जानातीत्यादिकं न प्रयुज्यते. ११६
अतोऽत्राभेदसंबन्धानवच्छिन्ना प्रकारता
तृतीयार्थतयोपेया केवला न प्रकारता ११७

शुक्तिकादावभेदेनेत्यादिकोक्तभ्रमस्थले
शुक्तिकां रजतं जानात्येवमादि प्रयुज्यते ११८
तादात्म्यात्मकसंबन्धेनावच्छिन्ना प्रकारता
अत्र कर्मत्वानुशिष्टद्वितीयादिभिरुच्यते. ११९
पदैरत्र प्रकारार्थपदतुल्यविभक्तिकैः
उपस्थाप्यविशेष्यत्वयुत एव तदन्वयः. १२०
अतोऽत्र शुक्तौ रूप्यत्वं जानातीत्यादिवाक्यवत्
न शुक्तिकायां रजतं जानातीत्यादिकं भवेत्. १२१
अभेदेन ह्यवच्छिन्ना यत्पदार्थप्रकारता
यत्पदार्थविशेष्यत्वविशिष्टान्वयशालिनी. १२२
समानलिंगवचनकत्वाभावे तयोरपि
असाधुत्वं समानाधिकरणत्ववतोरिव. १२३
तेनात्र भिन्नार्थकत्वाद्रंगरूप्यादिशब्दयोः
सामानाधिकरण्यस्य विरहेऽपि च न क्षतिः. १२४
रंगाणि रूप्यं जानाति स्त्रियं जानाति पुंश्चलान्
एवमादिप्रयोगाणां उक्तरीत्यैव वारणात्. १२५
ज्ञायते लोहितो वन्हिरित्यादौ गत्यभावतः
धात्वर्थे लोहितादीनां साक्षादन्वय इष्यते. १२६
सर्वैरपि घटो नीलो भवतीत्यादिके स्थले
नामधात्वर्थयोस्साक्षान्मिथोऽन्वय उपेयते. १२७
तथाचसति यत् ज्ञानं लोहितादिप्रकारकम्
तद्धीविशेष्यता वन्हावुक्तवाक्यात् प्रतीयते १२८

योगे मुख्यविशेष्यत्वमिच्छावाचकधातुभिः
द्वितीयार्थोऽथवोद्देश्यताख्या विषयता भवेत्. १२९
विधेयत्वं विशेष्येऽपि यथा क्वचिदुपेयते
उद्देश्यत्वं प्रकारेऽपि तथा क्वचिदुपेयते. १३०
तेनोद्देश्यसुखादीनां विशेषणतया क्वचित्
भानस्यानुभवेऽप्यत्र न च काचित् क्षतिर्भवेत्. १३१
ग्रामामिच्छत्येवमादिस्थले ग्रामादिकं पदम्
लक्षणात्मिकया वृत्त्या ग्रामस्वत्वादिबोधकम्. १३२
सिद्धं ग्रामादिकं स्वस्वत्वाद्यसिध्योपरंजितम्
इच्छायां कुत्रचिन्मुख्यविशेष्यत्वेन भासते. १३३
तत्रैव तादृशं वाक्यं सूरिभिस्संप्रयुज्यते
इति मुख्यविशेष्यत्वे द्वितीयार्थत्ववादिनः. १३४
पाकं चिकीर्षतीत्यादौ पाकशब्दादितः परा
द्वितीया च विशेष्यत्वरूपकर्मत्वबोधिका. १३५
तथाचसति पाकादिविशेष्यत्वनिरूपिका
कृतिप्रकारिका चेच्छा तस्माद्वाक्यात् प्रतीयते. १३६
यद्वा सनन्तं धात्वर्थविशेष्यत्वनिरूपिकाम्
इच्छां ब्रूते द्वितीयाऽपि धात्वर्थस्यैव कर्मताम्. १३७
गृहस्थितीच्छामादाय गृहं तिष्ठासतीत्यपि
प्रयोगस्स्यात् द्वितीयार्थो यदीच्छाकर्मता भवेत्. १३८
अत्राऽध्यकल्पे पिष्टादिभोजनेच्छादशासु च
पिष्टं बुभुक्षत इति प्रयोगो नोपपद्यते. १३९

यदीच्छा यत्र पिष्टादौ भोजनादिप्रकारिका
पिष्टं बुभुक्षत इति प्रयोगस्तत्र चेष्यते. १४०
तदा सन्प्रत्ययान्तस्य तत्प्रयोगोपपत्तये
धात्वर्थेदृश्यकेच्छार्थकत्वमभ्युपगम्यते. १४१
सन्प्रत्ययार्थभूतेच्छा कर्मप्रत्ययकस्थले
कृत्यादिरूपधात्वर्थप्रकारत्वेन भासते. १४२
तथाच तत्स्थले कर्मप्रत्ययेन लडादिना
इच्छाविशिष्टधात्वर्थकर्मत्वं प्रतिपाद्यते. १४३
वर्त्तमानत्वादिकालो लडादिभिरुपस्थितः
इच्छायामेवोभयत्राप्यन्वेतीत्यपि कथ्यते. १४४
प्रकृत्यैकदेशेऽपि प्रत्ययार्थान्वयः क्वचित्
उपेयते यथा नीलतरो घट इति स्थले. १४५
कर्माख्यातस्थलेऽप्यत्र धात्वर्थेन विशेषिता
इच्छैव सन्प्रत्ययेन वस्तुतः प्रतिपाद्यते. १४६
इच्छाकर्मत्वमेवात्र कर्माख्यातेन बोध्यते
तच्च धात्वर्थकर्मत्वेनेच्छाविषयतात्मकम्. १४७
कर्त्राख्यातस्थलेऽप्येषा कर्मतैव द्वितीयया
इच्छाविशेषणत्वेन वस्तुतः प्रतिपाद्यते. १४८
आकाशदर्शनाभावेऽप्याकाशं संदिदृक्षते
एवमादिप्रयोगोऽपि तथासत्युपपद्यते. १४९
सन्दर्शनादिकर्मत्वेनेच्छाविषयतात्मकम्
आकाशादौ दिदृक्षादिकर्मत्वं न हि बाधितम्. १५०

गृहस्थित्यादिविषयकेच्छायां हि गृहादिकम्
स्थित्याधारत्वादिनैव भासतेऽतोत्र न क्षतिः. १५१
समानकर्तृकत्वेन विशिष्टैव विशेष्यता
इच्छाधात्वर्थसंसर्गो न केवलविशेष्यता. १५२
तथाचसत्यन्यकर्तृकेच्छावत्यपि पूरुषे
अयं बुभुक्षत इति व्यवहारप्रसंगतः. १५३
समानकर्तृकपदं धातोरित्यादिसूत्रगम्
इच्छैककर्तृकत्वोपरक्तस्वार्थपरार्थकम्. १५४
सुबन्तेच्छार्थविहितक्यजाद्यन्तमकर्मकम्
तदन्तर्गतशब्देन चैवेच्छाकर्मबोधनात्. १५५
उपमानोत्तराचारविहितास्तु क्यजादयः
भृत्यं पुत्रीयतीत्यादौ तुल्यत्वज्ञानवाचकाः. १५६
अथवाऽत्र क्यजाद्यर्थो ज्ञानमात्रमुदीर्यते
पुत्रादिकं पदं गौण्या पुत्रादिसदृशार्थकम् १५७
स्वाभेदगोचरत्वेन पुत्रादिसदृशान्वयः
ज्ञाने तत्रैव भृत्यादिविषयित्वान्वयोऽपि च. १५८
यद्वा क्यजादिराचारसदृशाचारवाचकः
अत्राऽचारः पारवश्यतया ज्ञानं पालनमेव वा. १५९
पुत्रादेः प्रथमाचारे कर्मत्वेनान्वयो मतः
अन्त्येऽन्वेति द्वितीयान्तबोध्यभृत्यादिकर्मता. १६०
विषयत्वविशेषस्य यस्य साध्यत्वसञ्ज्ञिनः
इष्टसाधनताबुद्धिविशेष्यत्वं प्रयोजकम्. १६१

कृत्यर्थकरोत्यादिधातुयोगे द्वितीयया
तदेव बोध्यते नान्यद्विषयत्वमितीष्यते. १६२
नन्वेवं काशशब्दादिद्वितीयानुपपन्नता
भवेत् काशान् कटं चैत्रः करोतीत्यादिके स्थले. १६३
इतिचेत्तु द्वितीयार्थो योगे पूर्वोक्तधातुभिः
विलक्षणोपादानीयविषयत्वमपीष्यते. १६४
तस्य द्वितीयान्तरोपस्थाप्यं यत् साध्यताभिधम्
विषयत्वं तद्विशिष्टकृतावेव समन्वयः. १६५
अतः कटाद्यन्यकर्मसमभिव्याहृतिं विना
काशान् करोत्येवमादिप्रयोगो नैव संभवेत्. १६६
नाशकत्वादिकमपि योगे पूर्वोक्तधातुभिः
क्वचित् स्थले द्वितीयार्थः पूर्वोक्तविषयत्ववत् १६७
तथाहि तत्र विकृतिप्रकृतिभाप्यभेदतः
त्रैविध्यं कर्मणो भर्तृहर्यादिभिरुपेयते. १६८
निष्पाद्यते यत् क्रियया तदाद्यं कर्म कथ्यते
यथौदनादि पाकादेः कटमाल्यादिकं कृतेः १६९
अयोगे प्रकृतेरेतत् कर्म निर्वर्त्यमुच्यते
यस्य नाऽश्रियते तस्येत्यादिहर्युक्तिदर्शनात्. १७०
पूर्वभावविशिष्टस्य यस्यासत्वात्मकं क्रिया
विकारमुत्पादयति द्वितीयं कर्म तत् स्मृतम्. १७१
यथा कृतेर्मौक्तिकादि पाकादेस्तण्डुलादिकम्
उक्तं प्रकृतिकर्मत्वं तण्डुलादेरिति स्फुटम्. १७२

यः पूर्वभावो मालादिसन्दर्भविरहात्मकः
तदसत्वं हि मालादिसन्दर्भकृतितो भवेत् १७३
तथाच तद्विशिष्टस्याप्यसत्वं तत्कृतेर्भवेत्
इति मौक्तिककाशादेरुक्ता प्रकृतिकर्मता. १७४
प्राप्यं कर्म क्रियाजन्यफलाश्रयमुदीर्यते
यथा ग्रामादिगम्यादेः ज्ञानादेर्विषयोऽपि च. १७५
तथाच तण्डुलानोदनं पचत्येवमादिषु
तण्डुलादिद्वितीयार्थो नाशकत्वं क्रियान्वयि. १७६
उत्पादकत्वमितरः द्वितीयार्थ उपेयते
नाशकत्वाविशिष्टायां क्रिययाश्च तदन्वयः १७७
तथाचोत्पत्तिहेतुत्वं विनाशेऽत्र प्रतीयते
संयोगमन्नं पचतीत्यादयस्तेन वारिताः. १७८
तण्डुलारंभकः पाकात् संयोगोऽपि विनश्यति
तथापि तस्यनाशोऽत्र नोदनादिप्रयोजकः. १७९
संयोगनाशद्वारैव नाशकत्वमथापि वा
उक्तप्रयोगविरहात् द्वितीयार्थ उपेयते १८०
निर्वर्त्यकर्मसमभिव्याहारविरहस्थले
सेयोगं पचतीत्यादिप्रयोगोऽप्यत एव न. १८१
चैत्रः काष्ठं भस्म कुर्वन् कृत्वा तण्डुलमोदनम्
दुग्धञ्च दधि कृत्वाऽथ भुंक्ते दधियुतौदनम्. १८२
इत्यादौ च प्रकृत्याख्यकर्मवाचिपदोत्तरा
कृतौ द्वितीया काष्ठादिनाशकत्वस्य वेधिका. १८३

साध्यताख्या विषयता यद्वोत्पादकता कृतौ
मिळितं वा बोध्यतेऽत्र ह्यन्यया च द्वितीयया. १८४
स्रजं करोति पुष्पाणीत्यादौ पुष्पपदोत्तरा
विषयत्वविशेष्यस्य द्वितीया बोधिका भवेत्. १८५
सन्निवेशविशेषेण विशिष्टकुसुमात्मकः
स्रक्पदार्थो न कुसुमाद्यतिरिक्तः कटादिवत्. १८६
पुष्पोपादानककृतेर्विषयं न स्रगादिकम्
किन्तु तन्निष्ठविन्यासविशेषो विषयस्ततः. १८७
अतोऽत्र स्रजमित्यादिद्वितीयान्तपदात् कृतौ
विशिष्टसत्वनिर्वाहकत्वमेव प्रतीयते. १८८
स्रग्विशेषणविन्यासविशेषोत्पादिका कृतिः
तद्विशिष्टस्रक्पदार्थसत्वनिर्वाहिका भवेत्. १८९
श्यामं रक्तं करोत्यग्निरित्यचेतनकर्तृके
स्थले व्यापारवाचित्वं कृत्रो न कृतिवाचिता. १९०
अतोऽत्रोपादानताख्याविषयत्वं द्वितीयया
श्यामशब्दाद्युत्तरया बाधितत्वान्न बोध्यते. १९१
किंतु श्यामत्वयुक्तासत्वनिर्वाहकतात्मकम्
विशिष्टोच्छेदकत्वं तत् द्वितीयान्तेन बोध्यते. १९२
घटं रक्तं करोत्यग्निरित्यादौघटवाचकम्
पदं लक्षणया श्यामरूपवत्घटबोधकम्. १९३
कर्माख्यातेन विकृतिप्रकृत्यभिधकर्मणोः
मध्ये प्रकृतिकर्मत्वमेव हि प्रतिपाद्यते. १९४

क्रियन्ते भस्म काष्ठानीत्यादौ प्रकृतिवाचिना
पदेन तुल्यवचनमेवाख्यातमतो भवेत्. १९५
नात्र निर्वर्त्यकर्मत्वं लकारेणाभिधीयते
तथापि तद्वाचिपदात् प्रथमा साधुतां व्रजेत्. १९६
कर्मत्वं यत्र नामार्थविशेष्यत्वेन भासते
तत्रैव हि द्वितीयायास्साधुत्वमुपगम्यते. १९७
कर्मत्वं नात्र नामार्थविशेष्यत्वेन भासते
किंतु नामार्थधात्वर्थसंसर्गविधयैव हि. ७९८
अधिशीङ्त्यादिशास्त्राद्यत्राधारस्य कर्मता
आधारत्वं द्वितीयार्थस्तत्र चाऽधेयताऽथवा. १९९
अधिशेते स्थलीमेवमादौ स्थल्यादिशब्दतः
द्वितीयादेस्साधुतार्थमेवैतदनुशासनम्. २००
अधीते मासमित्यादौ पदात् कालादिवाचकात्
कालाध्वेत्यादिसूत्रेण द्वितीया ह्यनुशिष्यते. २०१
कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते. २०२
इति ह्युक्तरात्यैतदन्तराऽप्यनुशासनम्
अत्र द्वितीया मासादिपदाद्यद्यपि सिध्यति. २०३
तथापि कुटिला क्रोशं मासं रम्यैक्ष्यादिषु
द्वितीयासिद्धये सूत्रमेतदावश्यकं भवेत्. २०४
अधीते मासमित्यादाविदमेतत्सूत्रमन्तरा
उक्तस्थले द्वितीया हि न कथञ्चन सिध्यति. २०५

अत्र क्रियापदाभावात् कुत्र चान्तर्भविष्यति
क्रियान्तरं द्वितीयाऽत्र यस्य कर्मतया भवेत्. २०६
अधीता मासमित्यादौ कालाद्यर्थकशब्दतः
द्वितीयासिद्धयेऽप्येतत् सूत्रमावश्यकन्तथा. २०७
उत्करीत्याऽत्र कालादेः कर्मत्वस्योपपादने
अपि द्वितीया कृद्योगषष्ठ्या बाधान्न सिध्यति. २०८
अभिव्याप्तिश्च संबन्धस्सर्वैरवयवैरिह
या सूत्रेऽत्यन्तसंयोगपदेन ह्यभिधीयते. २०९
यत्कूटरूपो यस्तस्य त एवावयवा इह
मासादिकमिह त्रिंशद्दिनकूटादिकं भवेत्. २१०
त्रिंशद्दिनादिसंबन्धस्तथाचात्र प्रतीयते
स संबन्धो दिनत्रिंशत्त्वादिव्यापकतात्मकः. २११
त्रिंशत्त्वादेर्न्नमासादिपदार्थघटकत्वतः
मासादिपदलब्धस्य द्वितीयार्थप्रविष्टता. २१२
दुर्वचत्वादिह व्याप्यविशेषाघटितस्य च
अखण्डव्यापकत्वस्य न द्वितीयार्थता भवेत. २१३
अभावप्रतियोगित्वस्यावच्छेदकता तथा
अभावश्च द्वितीयार्थस्तथाच सति खण्डशः. २१४
प्रकृत्यर्थान्विताभावघटितस्य तदर्थयोः
आद्यार्थस्य द्वितीयार्थे प्रतियोगितयाऽन्वयः २१५
आद्यार्थेनान्वितस्यान्त्यस्यार्थस्याध्ययनादिषु
स्वाश्रयाश्रयतारूपसंबन्धेनान्वयो भवेत. २१६

स्वाश्रयश्चात्र चैत्राध्ययनत्वाद्यात्मकं ततः
तादृशाध्ययनत्वावच्छिन्ना व्यापकता भवेत्. २१७
प्रतियोग्याश्रयाद्वृत्तितास्वरूपं विशेषणम्
द्वितीयार्थगतेऽभावे प्रथमेऽत्र प्रदीयते. २१८
तेन त्रिंशद्दिनेष्वध्ययनसत्वस्थलेऽपि च
दिनावान्तरदण्डादौ तदसत्वेऽपि न क्षतिः २१९
अत्र मासपदं त्रिंशद्दिनतात्पर्यकं न तु.
अखण्डतावत्कालस्थवस्त्वन्तरपरं भवेत्. २२०
अन्यथाऽस्य प्रयोगस्य दिनैकाध्ययनस्थले
अप्यापत्तिस्तादृशाध्ययनाभावाद्यसत्वतः २२१
दिनञ्च मासघटकं न क्रियाप्रचयोऽपितु
अखण्डमेकदिवसमात्रावस्थायि वस्तु तत्. २२२
त्रिंशत्वं यत्तु मासान्तर्गतयावद्दिनस्थितम्
मासभेदेन तद्रूपमासत्वमपि भिद्यते. २२३
रूपेणानुगतेनैव संख्यारूपस्य तस्य च
मासादिपदशक्यत्वस्यावच्छेदकता मता. २२४
अतैकदिवसस्थायिद्रव्यस्यैव दिनात्मता
उपेयतेऽतस्तात्रिंशत्वस्य संख्यात्वमक्षतम्. २२५
दिवसं स्वपितीत्यादौ पदं हि दिवसादिकम्
नाखण्डार्थपरं किंतु क्षणकूटपरं भवेत्. २२६
नोत्पद्यते विना दण्डं कलशो रासभं विना
अप्युत्पद्यत इत्यादौ विनार्थोऽभाववान् भवेत्. २२७

द्वितीयार्थोऽनुयोगित्वं अभावे तस्य चान्वयः
उत्पत्तौ च विनार्थस्य वृत्तित्वेनान्वयो मतः. २२८
नामार्थस्य निपातार्थे साक्षादप्यन्वयस्ततः
द्वितीयासार्थकत्वानुपगमेऽप्यत्र न क्षतिः २२९
तथाप्यत्र द्वितीयायास्सार्थकत्वमुपेयते
नैरर्थक्यं यतोऽयुक्तं सति सार्थक्यसंभवे. २३०
दण्डं विना घटोत्पत्तिर्नैवमादिस्थलेषु च
विनान्तार्थे घटोत्पत्त्याद्यभावस्यान्वये सति. २३१
घटोत्पत्त्याद्यभावानुयोगिताप्रतियोगिकम्
भासतेऽवच्छेदकत्वं दण्डाभावादिवस्तुषु. २३२
अतो दण्डं विनेत्यादिवाक्यवद्रासभं विना
न घटोत्पत्तिरित्यादिवाक्यानां न प्रमाणता. २३३
घटोत्पत्त्याद्यभावानुयोगितातिप्रसक्तितः
न रासभादिविरहस्तदवच्छेदको भवेत्. २३४
वस्तुतोऽभावमात्रस्य विनार्थत्वमुपेयते
अनुत्पत्तौ प्रयोज्यत्वसंबन्धेन तदन्वयः. २३५
तेनोत्पद्यत इत्यादि पदाध्याहारमन्तरा
घटो दण्डं विना नेति प्रयोग उपपद्यते. २३६
अयं प्रयोगः पूर्वोक्तकल्पेनैवोपपद्यते
वृत्तित्वात् कलशादीनां दण्डाभावादिमत्यपि. २३७
सामानाधिकरण्येन कलशो रासभं विना
इत्यादौ रासभाद्यानां अभावस्य घटेऽन्वयः. २३८

विनाऽपि वातं पतितो वृक्ष इत्यादिके स्थले
आश्रयत्वेन वृक्षादौ विनार्थविरहान्वयः. २३९
वाताभावविशिष्टे च पातित्यप्रत्यये सति
वातजन्यत्वविरहः पतनेऽर्थात् प्रतीयते. २४०
गतः पुत्रं विनेत्यादिस्थले पुत्रादिकं पदम्
लक्षणात्मिकया वृत्त्या पुत्रगत्यादिबोधकम्. २४१
विनार्थविरहः पुत्रगत्यादिप्रतियोगिकः
सामानकालीनत्वेन गमनान्वयभाग्भवेत्. २४२
समानकालीनत्वान्तःप्रविष्टा कालसंस्थिता
स्वाधारताऽनवच्छिन्ना ग्रहाऽऽदेत्यभिधीयते. २४३
एवमेव विनाप्युक्ततृतीयापञ्चमीस्थले
ऋतेऽन्तरेत्यादियुक्तद्वितीयादिस्थलेऽपि च. २४४
अनुयज्ञं ववर्षेति स्थलेऽनुर्जन्यतार्थकः
तस्मिन् निरूपितत्वेन द्वितीयार्थस्य चान्वयः. २४५
अन्वर्जुनं हि योद्धार इत्यादावपकृष्टता
अन्वर्थोऽवधिमत्त्वञ्च द्वितीयार्थस्तदन्वयी. २४६
विद्यद्द्योतते वृक्षं प्रतीत्यादौ द्वितीयया
निरूपितत्वं प्रतिना बोध्यते परिचेयता. २४७
विद्यद्द्योतनं वृक्षप्रकाशेनानुमीयते
अतो विद्युद्द्योतनादेर्वृक्षादिपरिचेयता. २४८
मातरं प्रत्ययं साधुरित्यादौ प्रियकारिता
साधुताऽत्र निपातार्थस्संबन्धस्तत्प्रियान्वयी. २४९

द्वितीयार्थो निपातार्थसंबन्धप्रतियोगिता
तथाच मातृसंबन्धिप्रियकारीतिशाब्दधीः. २५०
यो मां प्रति स्यादित्यादौ भागस्स्वत्वाश्रयात्मकः
प्रत्याद्यर्थो द्वितीयार्थस्संबन्धोऽत्र तदन्वयी. २५१
वृक्षं वृक्षं प्रतीत्यादौ प्रतिशब्दो निरर्थकः
द्वितीया कर्मणि व्यापकत्वबोधो द्विरुक्तितः. २५२
माञ्च त्वाञ्चान्तरेत्यादौ द्वितीयार्थो निरूप्यता
मध्यत्वे चान्तराद्यर्थघटके स्यात्तदन्वयः. २५३

इति द्वितीया समाप्ता

अथतृतीया

या कारकतृतीया सा कर्तृत्वकरणत्वयोः
वाचिका कर्तृकरणयोस्तृतीयेति सूत्रतः. १
समभिव्यहृतायाञ्च क्रियायामन्वयस्तयोः
क्रियानुकूलत्ववती कृतिर्मुख्याऽत्र कर्तृता. २
चैत्रस्तु पचतीत्यादिकर्त्राख्यातस्थले तु सा
क्रियाविशेष्यत्वेनैव तदाख्यातेन बोध्यते. ३
चैत्रेण पच्यते तद्वच्छय्यते चैवमादिषु
क्रियाविशेषणत्वेन बोध्यते सा तृतीयया. ४
कृतिजन्यत्वमेवात्र तृतीयार्थोऽथ चेष्यते
तथाच जन्यताऽप्यत्र प्रकारत्वेन भासते. ५

संसर्गत्वेन जन्यत्वभाने चैत्रेण पच्यते
न मैत्रेणेत्यादिवाक्यात् नोपपद्येत शाब्दधीः. ६
जन्यत्वादिश्च संबन्धो न हि वृत्तिनियामकः
तथाच तदवच्छिन्नविरहो न प्रसिध्यति. ७
आख्यातार्थस्य कालस्य स्थले नञ्घटिते नञः
अर्थ एवान्वय इति व्युत्पत्तिरुपगम्यते. ८
अन्यथा नष्टकलशं न पश्यत्येवमादिषु
अप्रसिध्यादिदोषेण नोपपद्येत शाब्दधीः. ९
तेन मैत्रो यदा सुप्तः तदा चैत्रेण पक्ष्यते
न तु पच्यत इत्यादिप्रयोग उपपद्यते. १०
स्थले नञ्घटिते पाकत्वावच्छेदेन तद्वृति
चैत्रादिकृतिजन्यत्वविरहो बोध्यते नञा. ११
अन्यथा पचमानेऽपि चैत्रेऽनेन न पच्यते
इत्यादि स्यान्नञन्तार्थसत्वात् पाकेऽन्यकर्तृके. १२
तत्तत्कर्मकपाकत्वाद्यवच्छिन्नत्वमुक्तया
विशेषणतयैवात्र विरहो बोध्यते नञा. १३
शाब्दे चान्वयितावच्छेदकावच्छिन्नतैव हि
विशेषणस्य संबन्धे भातीतिनियमस्तु न. १४
यत्र तण्डुलमात्रस्य पाकस्तत्र न तेमनम्
चैत्रेण पच्यत इति प्रयोगस्तेन युज्यते. १५
यत्राचेतनकाष्ठादेः कर्तृत्वस्य विवक्षया
काष्ठेन पच्यते यद्वा स्थाल्येत्यादि प्रयुज्यते १६

तत्र व्यापारजन्यत्वं व्यापारो वा तृतीयया
काष्ठादौ कृतिमत्त्वस्य बाधाल्लक्षणयोच्यते. १७
न पच्यते घटेनैवमादयो गगनं घटः
न पश्यतीत्यादितुल्ययोगक्षेमत्वशालिनः. १८
ज्ञायते गम्यते देवदत्तेनेत्यादिके स्थले
वृत्तित्वमाश्रयत्वं वा बोध्यते हि तृतीयया. १९
नश्यते कलशेनैवमादावेवं तृतीयया
लक्ष्यते प्रतियोगित्वमनुयोगित्वमेव वा. २०
भाक्तं कर्तृपदञ्चापि व्यापारवदचेतने
अचेतने स्वरसतः कर्तृशब्दाप्रयोगतः. २१
सूत्रे कर्तृपदस्यार्थः तृतीयादिविधायके
कर्ता स्वतन्त्र इत्यादिसूत्रकृत्परिभाषितः. २२
तेनाचेतनकाष्ठादिवाचिकाष्ठपदादिभिः
योगे तृतीयादिकर्तृप्रत्ययोऽप्युपपद्यते. २३
स्वतन्त्र एव व्यापारे तृतीयाद्यनुशासनम्
तथापि लाघवाद्यत्ने तृतीयाशक्तिरिष्यते. २४
अचेतनस्थे व्यापारे निरूढा लक्षणैव हि
अनादितात्पर्यमात्रग्राहकश्चानुशासनम्. २५
लाघवेन युतस्यैव तात्पर्यस्य ह्यनादिनः
शक्तिकल्पकता तस्य केवलस्य न चेष्यते. २६
पाकादेः पचतीत्यादिकर्त्राख्यातस्थले कृतौ
विषयित्वानुकूलत्वसंबन्धाभ्यां यथाऽन्वयः. २७

तथा पच्यतइत्यादौ तृतीयार्थकृतेरपि
जन्यत्वविषयत्वाभ्यां पाकादावन्वयो मतः. २८
कृतिजन्यत्वार्थकत्वे तृतीयायास्तदन्वयः
स्वनिरूपकयत्नीयविषयत्वेन सम्मतः. २९
तृतीयार्थोऽथवा यत्नविषयत्वं तथासति
स्वनिरूपकजन्यत्वसंबन्धेन तदन्वयः. ३०
तृतीयार्थस्तु काष्ठेन पचतीत्यादिके स्थले
व्यापारवत्कारणत्वरूपा करणता भवेत्. ३१
चैत्रश्चैत्रेण पचतीत्यादीनां वारणाय च
स्वाभिन्नकर्त्रधीनत्वं व्यापारेऽत्र निवेश्यते. ३२
यत्र पाकक्रियामेकामेव चैत्रस्तुषादिभिः
मैत्रः काष्ठादिभिस्तद्वन्निष्पादयति साधनैः. ३३
तत्र मैत्रस्तुषैश्चैत्रः काष्ठैरित्यप्रयोगतः
समभिव्याहृतत्वञ्च प्रदेयन्तत्र कर्तरि. ३४
काष्ठेन पचतीत्यादौ यत्र कर्त्रर्थकं पदम्
नास्ति तत्र तृतीया तु हेतावित्यनुशासनात्. ३५
व्यापारवत्कारणत्वे ह्यधीनत्वे च तादृशे
शक्तिद्वयं तृतीयाया वस्तुतस्तूपगम्यते. ३६
कर्त्रर्थकपदासत्वस्थले तत्र तृतीयया
व्यापारवत्कारणत्वमात्रं हि प्रतिपाद्यते. ३७
शरैश्शातितपत्रोऽयमित्यादिः कर्तृवाचिनः
पदस्याध्याहृतिमृतेऽप्यत एवोपपद्यते. ३८

कारणत्वञ्चात्र भवेदुपधायकतात्मकम्
च्छिदामात्रे करणता दात्रादेरन्यथा भवेत्. ३९
धूमेनानुमिनोत्यग्निमित्यादौ धूमवाचकम्
पदं तद्बोधकं लिंगबुद्धेः करणतामते. ४०
धूमधीत्वाद्यवच्छिन्नकरणत्वकताऽत्र च
वन्ह्याद्यनुमितित्वावच्छेदेनैव प्रतीयते. ४१
यत्र धूमादिजन्यधियां वन्ह्याद्यनुमितौ तथा
घटादिरप्यन्यलिंगात् विधेयत्वेन भासते. ४२
उक्तावच्छेद्यताभानान्न भवेत् तत्स्थले घटः
धूमेनानुमिनोत्येवमादीनां हि प्रमाणता. ४३
घटाद्यनुमितित्वावच्छेदेनानुमितिर्न हि
धूमधीत्वाद्यवच्छिन्नकरणत्वनिरूपिका. ४४
परे तु लिंगज्ञानस्य करणत्वमतेऽपि च
धूमादिशब्दो मुख्यार्थपर एव न धीपरः. ४५
तृतीया चात्र हेतुत्वे तत्प्रयोजकतात्मकम्
जनकज्ञानविषयधूमादेरपि चाक्षतम्. ४६
अतिप्रसंगः पूर्वोक्तसमूहालंबनस्थले
पूर्वोक्तरीत्यैवात्रापि मते सम्यङ्निवार्यते. ४७
वस्तुतोऽत्र द्वितीयार्थे तृतीयार्थान्वयौ मतः
कार्यतावच्छेदकेऽपि जनकादिप्रयोज्यता. ४८
न घटादिविधेयत्वकत्वे धूमप्रयोज्यता
अतिप्रसंगो नोक्तोऽतस्समूहालंबनस्थले. ४९

अप्रयोगे नञो यद्वत् तृतीयार्थान्वयस्तथा
नञ्योगेऽपि द्वितीयार्थे नञर्थविरहान्वयः. ५०
तेन वन्ह्याद्यनुमितौ घटात् द्रव्यञ्च भासते
तत्र चानुमिनोत्यग्निन्नघटेनेति युज्यते. ५१
पूर्वोक्तपक्षेऽनुमितावेव वाच्यस्तदन्वयः
न युज्यते तथाचायं प्रयोग इति चक्षते. ५२
क्रियाप्रयोगविरहात् एष धूमेन वन्हिमान्
इत्यादिके स्थले हेतुतृतीयैवेति कथ्यते. ५३
सहार्थयोगे साहित्यप्रतियोग्यर्थकात् पदात्
तृतीया सह पुत्रेण गतइत्यादिके स्थले. ५४
समभिव्याहृताच्छब्दात् या क्रियोपस्थिता भवेत्
सहादिशब्दो गत्यादितत्क्रियाकालवाचकः. ५५
तृतीयार्थोऽत्र कर्तृत्वं तत् सहार्थक्रियान्वयि
क्रियान्वयिनिनामार्थे सहार्थस्यान्वयो भवेत्. ५६
तत्कालयुक्ते नामार्थे क्रियाया अन्वये सति
तत्कालावच्छिन्नता हि क्रियायामपि भासते. ५७
अतोऽत्र क्रिययोस्तुल्यकालीनत्वं हि लभ्यते
तत्कालावच्छिन्नता न तत्कालावृत्तिवस्तुनः. ५८
यद्वा सहार्थो गमनकालीनगमनादिकम्
तस्य कर्तृत्वादिना च नामार्थेऽन्वय इष्यते. ५९
अन्तर्भावश्च कालस्य क्षणत्वेनैव कुत्रचित्
क्वचिच्चस्थूलकालत्वेनान्तर्भाव इतीर्यते. ६०

एकशालैकपंक्त्यादिरूपाधारोऽपि कुत्रचित्
सहार्थेऽन्तर्भावनीय इति सर्वं समञ्जसम्. ६१
तापसो जटयेत्यादौ पदालक्षणवाचकात्
इथंभूतेतिशास्त्रेण तृतीया ह्यनुशिष्यते. ६२
व्यावर्तकत्वमेवात्र लक्षणत्वं तदाश्रयः
धर्मो विशेषणञ्चोपलक्षणञ्चेति हि द्विधा. ६३
विशेषणन्तत्र विद्यमानं व्यावर्तकं यथा
विद्यमानं वर्तमानकाले दण्डादि पूरुषे. ६४
द्वितीयं तत्र चाविद्यमानं व्यावर्तकं यथा
कालान्तरे विद्यमानं तापसादौ जटादिकम्. ६५
तयोर्विशेषणस्यैव संबन्धो मतुबादिभिः
प्रत्याय्यते वर्तमानधर्मसंबन्धवाचकैः. ६६
तथाचोक्तस्थले यर्हि जटादिरुपलक्षणम्
तदा तृतीयैव भवेत् मतुपोऽनवकाशतः. ६७
ज्ञायमानत्वेन लिंगमित्यादौ वाचकात् पदात्
विशेषणस्यापि भवेत् तृतीयोक्तानुशासनात्. ६८
यद्यत्रावच्छेद्यतैव तृतीयार्थस्तदन्वयः
करणत्वे तदाऽपीयमुक्तादेवानुशासनात्. ६९
वस्तुतो ज्ञायमानत्वविशिष्टे करणान्वये
करणत्वे ज्ञायमानत्वावच्छिन्नत्वलाभतः. ७०
लिंग एव तृतीयार्थस्यान्वयो युज्यते न तु
करणत्वे पदार्थैकदेशे युक्तस्तदन्वयः. ७१

इति तृतीया समाप्ता

अथ चतुर्थी

विप्राय गां ददात्येवमादौ विप्रादिशब्दतः
परा चतुर्थी विप्रादिसंप्रदानत्वबोधिका. १
कर्मणा यमभिप्रैतीत्यस्य सूत्रस्य शाब्दिकैः
यं कर्मणाभिसंबद्धुमिच्छतीत्यर्थ उच्यते. २
कर्मत्वञ्च क्रियाजन्यं फलं तच्शालिना सह
संबन्धिता च तन्निष्ठफलसंबन्धिता मता. ३
तथासति क्रियाजन्यफलसंबन्धवत्तया
कर्त्राभिप्रेतता संप्रदानता पर्यवस्यति. ४
तादृक्फलाश्रयत्वेन कर्त्राभिप्रेततैव हि
कर्तुरित्यादिसूत्रोक्तकर्मतेत्यनयोर्भिदा. ५
तथेत्याद्युक्तकर्मत्वस्येच्छाद्यघटितत्वतः
निरुक्तसंप्रदानत्वाद्विद्यते महती भिदा. ६
कर्तुर्विप्रादिकं त्यागजन्यस्वत्वनिरूपकम्
भूयादितीच्छावत्त्वेन विप्रादेस्संप्रदानता. ७
फलाश्रयतया कर्तुरभिप्रायस्थले यतः
बाध्यते संप्रदानत्वं परया कर्मसंज्ञया. ८
तत आश्रयताभिन्नस्संप्रदानत्वकुक्षिगः
संबन्ध इति लाभान्न कर्मणस्संप्रदानता. ९
कर्मत्वकुक्षौ धात्वर्थतावच्छेदकतावतः
फलस्यैव प्रविष्टत्वमित्येतत् पूर्वमीरितम्. १०

अतोऽत्र संप्रदानत्वमविष्टाऽप्यन्यता भवेत्
तथाविधफलस्यैवाऽश्रयत्वमतियोगिका. ११
वृक्षायाऽसिञ्चति जलं पत्यै शेत इतिस्थले
वृक्षादिस्थं फलं नैव धात्वर्थघटकं भवेत्. १२
अत उक्तस्थले वृक्षपत्यादेस्संप्रदानता
फलाश्रयतया कर्तुरिष्टत्वेऽप्युपपद्यते. १३
चतुर्थ्याचात्र धात्वर्थगतस्वत्वान्वयित्ववत्
निरूपिततया कर्तुरिष्टत्वं प्रतिपाद्यते. १४
केचिद्ददातिना योगे नेदृशी संप्रदानता
किंतु धात्वर्थगस्वत्वप्रतियोगित्वरूपिणी. १५
निरूपितत्वमात्रं हि चतुर्थ्यर्थस्तथासति
अत्र धात्वर्थघटके स्वत्वे तस्यान्वयो भवेत्. १६
अतश्श्राद्धस्य यागत्वमेव पित्राद्यपेक्षया
ब्राह्मणापेक्षया दानतेत्युक्तं शूलपाणिना. १७
यदि चोद्देश्यतागर्भं संप्रदानत्वमुच्यते
तदा पितृनपेक्ष्यापि भवेत् श्राद्धस्य दानता. १८
पितृणां स्वत्वभागित्वेनोद्देश्यत्वस्य मन्त्रतः
सिद्धावपि न तत्स्वत्वं जायते ह्यप्रतिग्रहात्. १९
धात्वर्थतानवच्छेदकत्ववत्फलवत्वतः
यत्र स्यात् संप्रदानत्वं तत्रेच्छागर्भमेव तत्. २०
अन्योद्देशेन शयनात् यत्र पत्युः सुखागमः
तत्र पत्यै शेत इति प्रयोगाणामभावतः. २१

कर्तुर्वृत्तितयेष्टं यत् फलं तत्प्रतियोगिकम्
जनकत्वं चतुर्थ्यर्थः तत्र तस्य क्रियान्वयः. २२
अनिराकर्तृपित्रादिनिष्ठा या संप्रदानता
सा कर्तुस्त्यागजस्वत्वभाक्त्वेनोद्देश्यता भवेत्. २३
इच्छाद्यघटिता पूर्वमुक्ता या संप्रदानता
लघीयसी सैव मुख्या भाक्ताऽन्या संप्रदानता. २४
यतश्चतुर्थ्याश्चोद्देश्यत्वागर्भे शक्तिरिष्यते
अन्यत्र संप्रदानत्वे लक्षणेति प्रचक्षते. २५
चैत्रदानस्थले चैत्रपत्न्यै दत्तमितीदृशः
प्रयोगस्स्यादानसंप्रदानत्वं यदि चेदृशम्. २६
चैत्रदानेन तत्पत्न्या अपि सत्वं हि जायते
अत एव च दंपत्योर्मध्यगन्धनमुच्यते. २७
सर्वत्रैवात उद्देश्यत्वान्तर्भावोऽभ्युपेयते
पितृणामपि मुख्यन्तत् संप्रदानत्वमिष्यते. २८
यद्वा स्वकीयस्वत्वेच्छाधीनतत्कत्वमेव वा
मुख्यं दानक्रियासंप्रदानत्वमुपगम्यते. २९
पितृस्वत्वस्याप्रसिध्या पितृणां स्वपदार्थता
न संभवत्यतस्तेषां न ह्येषा संप्रदानता. ३०
तथासति ब्राह्मणाय ददातीत्यादिके स्थले
चतुर्थ्यर्थो निरूप्यत्वमात्रं स्वत्वान्वायित्ववत्. ३१
त्यागे च स्वत्वनाशेच्छारूपे स्वेच्छाप्रयोज्यता
हेतुत्वञ्चैतदुभयं स्वत्वसंसर्ग इष्यते. ३२

तल्लाभश्च विशिष्टस्य धात्वर्थत्वमते भवेत्
शक्त्यैवान्यमते लाभस्तस्याऽऽकांक्षाबलात् भवेत्. ३३
या चतुर्थ्यनिराकर्तृसंप्रदानपदोत्तरा
तस्या निरूपितत्वेन चोद्देश्यत्वे हि लक्षणा. ३४
भयं ददाति रिपव इत्यादौ कर्मयोगतः
संप्रदानं रिपुर्धातोरर्थश्चोत्पादिका क्रिया. ३५
ददाति मलिनं वस्त्रं रजकस्यैवमादिषु
ददातिना परायत्तीकरणं प्रतिपाद्यते. ३६
परकर्तृकानेर्णजनाभिप्रायप्रकाशकः
व्यापारोऽत्र परायत्तीकरणं परिकीर्त्यते. ३७
तदेकदेशकर्तृत्वे संबन्धस्य विवक्षया
रजकादेश्शेषषष्ठी रजकादिपदात् भवेत्. ३८
संवाहकस्य चरणं पृष्ठं हन्तुः प्रयच्छति
धात्वर्थादिकमित्याद्यावृहनीयं स्वयं बुधैः. ३९
पुष्पेभ्यः स्पृहयत्येवमादाविच्छार्थकः स्पृहिः
विषयित्वं चतुर्थ्यर्थः तस्येच्छायां मतोऽन्वयः. ४०
रुच्यर्थप्रीतिहेतुत्वघटकप्रीतिभागिनः
रुच्यर्थानामित्यनेन विहितासंप्रदानता. ४१
तथा प्ररोचते गौरी शंकरायैवमादिषु
आधेयत्वं चतुर्थ्यर्थः प्रीतौ तस्यान्वयो भवेत्. ४२
क्रुधिद्रुह्यादिधात्वर्थकर्मणः संप्रदानता
क्रुधद्रुहेत्यादिनानुशासनेनानुशिष्यते. ४३


पुत्राय क्रुध्यतीत्यादौ द्वेषभेदार्थकः क्रुधिः
विषयित्वं चतुर्थ्यर्थः द्वेषभेदे तदन्वयः. ४४
भक्तिश्रद्धादिवध्यद्वा ज्ञानभेदार्थकः क्रुधिः
क्रुध्यर्थस्सर्वथाऽप्यत्र विषयत्वनिरूपकः. ४५
शत्रभ्यो द्रुह्यतीत्यादावहितेच्छार्थको द्रुहिः
आहितान्वयि वृत्तित्वं चतुर्थ्यर्थ उदीर्यते. ४६
दुर्योधनः पाण्डवेभ्यो दुष्ट ईर्ष्यत्यसूयति
इत्यादौ च चतुर्थ्यर्थो विषयित्वं क्रियान्वयि. ४७
परोत्कर्षद्वेषरूपपरोत्कर्षासहिष्णुता
ईर्ष्याऽसूया तु गुणिनि दोषाविष्करणं भवेत्. ४८
यूपाय दार्वेत्यादौ संप्रदाने न पूर्ववत्
चतुर्थी किंतु तादर्थ्य इति शास्त्रान्तरोदिता. ४९
तादर्थ्यञ्च तदिच्छाधीनेच्छाविषयताश्रयः
व्यापारो यस्तक्षणादिरूपस्तद्वत्वमिष्यते. ५०
पाकाय व्रजतीत्यादौ तुमर्थाच्चेतिसूत्रतः
चतुर्थीच्छाप्रयोज्येच्छाविषयत्वे तदर्थता. ५१
एवेभ्यो व्रजतीत्यादौ क्रियार्थोपपदेत्यतः
चतुर्थ्याहरणाद्यर्थकत्वबोधस्ततो गतौ. ५२
अश्वाय घास इत्यादावश्वशब्दोऽश्वभोजने
वर्तते तत्र तादर्थ्यचतुर्थ्येवेति कथ्यते. ५३
नमस्स्वस्त्यादिशब्दार्थविशेषणपदोत्तरम्
नमस्स्वस्तीतिसूत्रेण चतुर्था ह्यनुशिष्यते. ५४

त्यागार्थकं नमस्कारवाचकञ्च नमःपदम्
शिवाय नम एषोऽर्घ्य इत्यादौ त्यागवाचकम्. ५५
प्रत्याय्यते चतुर्थ्या च प्रकृत्यर्थे शिवादिके
उद्देश्यत्वं नमश्शब्दबोध्यत्यागनिरूपितम्. ५६
अर्घ्यश्चायं शिवस्यास्त्वित्यादीच्छाधीनताश्रया
स्वस्वत्वविरहेच्छैव त्याग इत्युच्यते यदि. ५७
त्यागीयमुद्देश्यत्वञ्च स्वत्वभागितया तदा
इच्छा या त्यागजनिका तस्या विषयतात्मकम्. ५८
यदीच्छा त्यागरूपैव स्वत्वञ्च त्यज्यमानगम्
विषयीकुरुते ह्यन्यदीयत्वेनेति कथ्यते. ५९
उद्देश्यत्वं तदा तच्च स्वत्वभागितया तथा
इच्छायास्त्यागरूपाया एव गोचरतात्मकम्. ६०
त्यज्यमानोपचारादौ शिवस्वत्वाद्यभावतः
विसंवादात्मिकैवेच्छा तस्मिंस्तदवगाहिनी. ६१
जन्यत्वेन च पूर्वोक्तजनकेच्छाविशिष्टता
चतुर्थ्यर्थः कल्प आद्ये तत्तान्वेति शिवादिकम्. ६२
द्वितीये तु चतुर्थ्यर्थो विषयत्वं शिवादिकम्
निरूपितत्वेनान्वेति चतुर्थ्यर्थ इतीर्यते. ६३
विषयत्वविशेषेण द्रव्ये त्यागस्य चान्वयः
विषयित्वविशेषेण द्रव्यस्य त्याग एव वा. ६४
पुरुषो यस्स्वप्रयोक्ता नमस्स्वाहादिभिः पदैः
तत्कर्तृकत्वोपरागेणैव त्यागो विधीयते. ६५

उपलक्षणभूतं यत् स्वप्रयोक्तृत्वमत्र च
वेदीयत्वं तत्प्रविष्टप्रयोगे च विशेषणम्. ६६
नमस्कारः स्वकीयापकर्षबोधप्रयोजकः
स्वीयव्यापाररूपोऽत्र स्वमुच्चारयिता मतः. ६७
चतुर्थ्या चावधित्वं वा तद्वत्त्वं वाऽत्र बोध्यते
नमःपदार्थघटकस्वापकर्षे तदन्वयः. ६८
नारायणं नमस्कृत्येत्यादौ बाधात् द्वितीयया
न कारकविभक्तित्वाच्चतुर्थी बलयुक्तया. ६९
अत्र च स्वापकर्षावधित्वबोधविशेष्यता
बोध्यते हि निपातेन व्यापारश्च कृधातुना. ७०
निपातार्थस्य धात्वर्थे चानुकूलतयाऽन्वयः
नारायणादेरेवञ्च कर्मत्वमुपपद्यते. ७१
अपकर्षावधित्वस्य विवक्षातः स्वयंभुवे
नमस्कृत्येत्येवमादौ चतुर्थी ह्युपपद्यते. ७२
स्वस्त्यर्थ आशीस्सा चेच्छा स्वीयाऽन्यहितगोचरा
तद्योगे च चतुर्थ्यर्थस्संबन्धस्स हितान्वयी. ७३
उत्तमर्णस्य विप्रादेः धारेरित्यादिसूत्रतः
विप्रायैकं धारयतीत्यादौ स्यात् संप्रदानता. ७४
धात्वर्थोऽत्रेतरद्रव्यदानमभ्युपगम्य यत्
परदत्तधनादानं तज्जन्यादृष्टमुच्यते. ७५
चतुर्थ्यर्थोऽत्र कर्तृत्वं दाने तद्घटकेऽन्वयः
अत्राभेदो द्वितीयार्थस्तस्य दत्तधनेऽन्वयः. ७६

दुरदृष्टमृणादानादधमर्णस्य जायते
तेनैवापरिशोध्यर्णं मृतस्य नरकादिकम्. ७७
शोधनेनाधमर्णस्य तददृष्टं विनश्यति
अतो न परिशोध्यर्णं मृतस्य नरकादिकम्. ७८

इति चतुर्थी समाप्ता



अथ पञ्चमी


वृक्षाच्च पर्णं पततीत्यादौ भावनिरूपितम्
प्रत्याय्यतेऽपादानत्वं मञ्चम्या वृक्षसंश्रयम्. १
स्ववृत्तिभेदप्रतियोगित्वावच्छेदिका क्रिया
या तज्जन्यविभागाश्रयताऽपादानता मता. २
विभागभेदप्रतियोगित्वावच्छेदकत्वयोः
पञ्चम्याः कल्प्यते शक्तिः पृथगेवात्र सूरिभिः. ३
प्रकृत्यर्थान्वयो वृत्तित्वेन भेदविभागयोः
तत्पञ्चम्यर्थयोर्हेत्वाश्रयत्वाभ्यां क्रियान्वयः. ४
यद्वा विभागहेतुत्वं पञ्चम्यर्थस्तथासति
उभयस्याश्रयत्वेनाप्यन्वयः पतनादिषु. ५
विभागो जनकत्वञ्च पञ्चम्यर्थोऽत्र वस्तुतः
विभागेऽवधिमत्त्वेन प्रकृत्यर्थान्वयो मतः. ६
प्रकृत्यर्थविशिष्टस्य विभागस्य मतोऽन्वयः
जनकत्वेऽत्र जनकतोपधायकतात्मिका. ७

अपादानत्वमवधितात्पर्कं कुत्राचिद्यथा
वृक्षाद्विभजते पत्रमित्यादाविति कथ्यते. ८
वृक्षाद्यवधिकत्वं हि विभागेऽत्र प्रतीयते
तद्विशिष्टविभागस्य पर्णे चाऽश्रयता तथा. ९
व्याघ्रात् बिभेति दस्युभ्यो रक्षतीत्येवमादिषु
व्याघ्रादिकमपादानं भीत्रार्थेत्यनुशासनात्. १०
अत्र भीतिस्तु परतोऽनिष्टसंभावना मता
तद्रक्षणमनिष्टं हि यद्व्यापारान्निवर्तते. ११
एवञ्चात्रोभयत्रापि पञ्चम्यर्थः प्रयोज्यता
धात्वर्थघटकेऽनिष्टे तस्याश्चान्वय इष्यते. १२
कूपादन्धं वारयति यवात् गामेवमादिषु
क्रियानिषेधो धात्वर्थः क्रिया गत्यादिरूपिणी. १३
वारयत्यादिना चात्र तात्पर्यवशतः क्वचित्
क्रियाया एव कस्याश्चित् प्रतिषेधः प्रतीयते. १४
पञ्चम्यर्थोऽत्र वृत्तित्वेनेच्छाविषयतेष्यते
इच्छा गत्यादिकर्तृस्था पञ्चम्यर्थे प्रवेश्यते. १५
प्रकृत्यर्थस्य वृत्तित्वे पञ्चम्यर्थगतेऽन्वयः
पञ्चम्यर्थस्य गत्यादिघटके च फलेऽन्वयः. १६
पुराणं पण्डिताच्चैत्रः शृणोतीत्येवमादिषु
पञ्चम्यर्थः कर्तृताकोच्चारणाधीनतोच्यते. १७
प्रकृत्यर्थस्य कर्तृत्वे वृत्तित्वेनान्वयो मतः
पञ्चम्यर्थगते तस्य धात्वर्थश्रवणादिषु. १८

जनिकर्तुः प्रकृतिरित्यनेन च मृदो घटः
जायते ह्येवमादौ तु मृदोऽपादानतेष्यते. १९
प्रकृतित्वं कारणत्वमेवात्र न विकारिता
प्राक्कैकयीतो भरतस्ततोऽभूदिति दर्शनात्. २०
कलशो जायते दण्डात्तरीतो जायते पटः
इत्यादयः प्रयोगाश्च पण्डितानां हि सम्मताः. २१
भुवः प्रभव इत्यस्माच्छास्त्राद्धिमवतो गिरेः
गंगा प्रभवतीत्यादावपादानत्वमिष्यते. २२
संबन्धाधीनत्वरूपपञ्चम्यर्थगतेऽन्वयः
प्रकृत्यर्थस्य संबन्धे पञ्चम्यर्थः क्रियान्वयी. २३
आद्यप्रकाशरूपाऽत्र क्रिया स त्वनुशासने
प्रभवो यस्य संबन्धात् प्रकाशः प्रथमो भवेत्. २४
अस्मादीर्घोऽयमित्यादौ न ह्यपादानपञ्चमी
यतोऽपादानता दैर्घ्याद्यवधेर्नानुशिष्यते. २५
या विभागक्रिया यश्च विभागोऽन्यक्रियाभवः
अपादानत्वमवधेस्तयोरेवानुशिष्यते. २६
अत्र केनापि सूत्रेण पञ्चमी नोपपद्यते
पञ्चमीसिद्धयेऽत्रानुसार्यं सूत्रान्तरं ततः. २७
भिन्नोऽस्मादयमित्यादावन्यारादिति सूत्रतः
पञ्चम्यन्यपदस्थात्र ह्यन्यार्थकपरत्वतः. २८
अत्रैकमन्येतरयोरन्योन्याभाववत् परम्
पृथक्त्ववत् परञ्चान्यद्व्यर्थं नैकमतस्तयोः. २९

पृथक्पदमसाहित्यपरं न गुणवत् परम्
पृथग्विनेत्यादिसूत्रे ततस्तदपि सार्थकम्. ३०
यद्वा तत्पदयोरेकमन्योन्याभाववाचकम्
प्राधान्येनापरं तद्वद्वाचकं सार्थकं ततः. ३१
वस्तुतोऽन्येतरपदं स्वरूपपरमेव हि
अन्यथाऽन्यार्थकैर्योगे पञ्चमी स्यात्तदादिभिः. ३२
अतोऽस्मात् भिन्न इत्यादौ पञ्चम्या उपपत्तये
अपादानत्वमेवोपपादनीयं कथञ्चन. ३३
अर्जुनो विध्यति क्रोशाल्लक्ष्यमित्येवमादिषु
सप्तमीत्यादि सूत्रेण पञ्चमी ह्यनुशिष्यते. ३४
पञ्चम्येषा कारकयोः क्रोशादौ मध्यवर्तिताम्
अभिधत्ते तूहनीयं पञ्चम्यर्थान्वयादिकम्. ३५

इति पञ्चमी समाप्ता



अथ षष्ठी

चैत्रस्य द्रव्यमित्यादौ शेषे षष्ठीति सूत्रतः
षष्ठी तदर्थस्संबन्धत्वेन संबन्ध इष्यते. १
स्वत्वहेतुत्वावयवत्वाद्यानां तत्तदात्मना
संबन्धानां तदर्थत्वे शक्त्यानन्त्यप्रसंगतः. २
तत्तद्रूपेण संबन्धबोधेच्छातः प्रयुज्यते
यत्र षष्ठी तत्र षष्ठ्यास्तत्तद्रूपेण लक्षणा. ३

पूर्वप्रयोगविरहाच्चैत्रो हस्तस्य चैत्रवान्
हस्त इत्यादिरूपाणां प्रयोगाणामसाधुता. ४

इति षष्ठी समाप्ता




अथ सप्तमी

अर्थो वृत्तित्वमाधारसप्तम्यास्तत् क्रियान्वयि
आधाराधेयभावश्च पदार्थान्तरमेव हि. १
स संयोगादिरूपश्चेत् कुण्डसंयोगवत्त्वतः
बदरादेरपि तथा कुण्डाद्याधारता भवेत्. २
सोऽयञ्च संबन्धविशेषावच्छिन्न इतीर्यते
संयोगेनायमाधार इत्यादिव्यवहारतः. ३
आधारतैव संयोगेनावच्छिन्नाऽतिरिच्यते
स्वावच्छेदकसंबन्धस्वरूपैवापराऽथवा. ४
आधारत्वव्यवहृतौ समवायानुयोगिता
तावत् प्रयोजिका तेन वार्यतेऽतिप्रसक्तता. ५
अतिप्रसंगः पूर्वोक्तरीत्या चेद्वार्यते तदा
संयोगावच्छिन्नमपि संयोगात्मकमस्तु तत्. ६
सप्तम्यर्थो निरूप्यत्वं भूतले वर्तते घटः
इत्यादौ तस्य धात्वर्थे चाऽधेयत्वात्मकेऽन्वयः. ७
अथवा वृतिधात्वर्थस्त्वाधारत्वन्न वृत्तिता
एवञ्चात्रापि चाऽधेयत्वार्थिकैव हि सप्तमी. ८

भुवि चैत्रः प्रयात्येवमादौ यत्र क्रियाश्रयः
न सप्तमीप्रकृत्यर्थः किंतु कर्त्रादिको भवेत्. ९
सप्तम्यास्तत्र कर्त्रादिघटिता या परंपरा
तदवच्छिन्नवृत्तित्वमेवार्थोऽभ्युपगम्यते. १०
क्वचित् परंपरासंसर्गोऽपि वृत्तिनियामकः
प्रतीतिबलतस्साक्षात्संबन्ध इव कल्प्यते. ११
वृक्षाग्रे कपिसंयोग इत्यत्राऽधारसप्तमी
अकारकाधारवाचिपदादपि विधीयते. १२
चर्मणि द्वीपिनं हन्तीत्यादौ चर्मपदोत्तरम्
निमित्तादिति शास्त्रेण सप्तमी ह्यनुशिष्यते. १३
सप्तम्या चात्र चर्मादौ हननादिनिमित्तता
बोध्यतेऽत्र निमित्तत्वं न हि कारणतात्मकम्. १४
किंतु या विनियोज्यत्वेनेच्छा हननकारणम्
तदीयं विषयत्वञ्च तन्निमित्तत्वमीर्यते. १५
व्याघ्रचर्मादिसंबन्धस्सप्तम्या नात्र बोध्यते
साधुत्वे किंतु सप्तम्यास्तत्संबन्धः प्रयोजकः. १६
गतोऽयं दुह्यमानासु गोष्वित्यादौ च सप्तमी
गोदुह्यमानादिपदात् यस्यचेत्यादिसूत्रतः. १७
अभिधत्ते सप्तमीयं समभिव्याहृतां क्रियाम्
समकालीनता तस्यास्संबन्धो गमनादिषु. १८
अतीतार्थककृद्योगे त्वानन्तर्यन्तथा भवेत्
भाव्यर्थकमयोगे तु स्यात् प्राक्कालीनता तथा. १९

तृषा पाथसि पीते हि शाम्यतीत्येवमादिषु
कार्यकारणभावोऽपि संसर्गत्वेन भासते. २०
गुणान्यत्वे सतीत्यादौ सप्तम्या उपपत्तये
अध्याहार्यं सत इति सतीत्यस्मादनन्तरम्. २१
अत्रासिधातुराधारतान्तु ब्रूते तथासति
तामेव सप्तमी ब्रूते गुणान्यत्वपदोत्तरा. २२
सामानाधिकरण्येन सप्तम्यर्थस्य चान्वयः
सत इत्यसिधात्वर्थ इति सर्वा विभक्तयः. २३

इति सप्तमी समाप्ता



व्युत्पत्तिवादसिद्धान्तमालेयं गोदवर्मणा
श्रीकोटिलिंगराजेन शिवोरसि समर्पिता.

शुभमस्तु